संस्कृत-वार्ता:

दिनाङ्क :.06.01.2026 सायम् - 06:20

आदौ मुख्यवार्ता:

- निर्वाचनायोगेन उत्तर-प्रदेशे विशेष-पुनरीक्षण-प्रक्रियायाः अनन्तरम् अद्य राज्यस्य प्रारूप-मतदातृ-सूचिः प्रकाशिता। अस्यां सूच्यां पञ्च-पञ्चाशत् लक्षाधिक-द्वादशकोटि-मतदातारः सम्मिलिताः सन्ति।

- शिक्षामन्त्रिणा धर्मेन्द्रप्रधानेन अद्य देशस्य पञ्च-शास्त्रीय-भाषाणां पञ्चपञ्चाशत् दुर्लभाः बहुमूल्याः च साहित्यिक-कृतयः लोकार्पिताः।

- केन्द्रीय-माध्यमिक-शिक्षा-परिषदा अद्य परीक्षा-सम्बद्ध-कष्टं निवारयितुं छात्राणां कृते मनोसामाजिक-परामर्श-समर्थनम् आरब्धम्।

- देशस्य अतिशयभागेषु सघन-कुज्झटिका-कारणेन बहुत्र रेलसेवा दुष्प्रभाविता। दिल्ली सम्भागस्य सप्ततिः रेलयानानि विलम्बेन प्रचलन्ति।

- भारतस्य लक्ष्य सेनः मलेशियायाः कुआलालम्पुरे मलेशिया-ओपन- सुपर-750 इति बैडमिंटन-स्पर्धामालिकायां पुरुषैकलवर्गस्य द्वतीयचक्रे प्रविष्टः। ।

अथ वार्ता: विस्तरेण

उत्तरप्रदेशे मतदातृसूचिः

निर्वाचनायोगेन उत्तर-प्रदेशे विशेष-पुनरीक्षण-प्रक्रियायाः अनन्तरम् अद्य राज्यस्य प्रारूप-मतदातृ-सूचिः प्रकाशिता। इतः पूर्वं प्रारूप-मतदातृ-सूचेः प्रकाशनं विगते दिसम्बर-मासे एकत्रिंशे दिने निरिधारितम् आसीत्। उत्तर-प्रदेशस्य मुख्य-निर्वाचनाधिकारी नवदीप ऋणवा अवदत् यत् अस्यां सूच्यां पञ्च-विंशत्यधिक-षड्पञ्चाशदुत्तर-पञ्च-पञ्चाशत्-लक्षाधिक-द्वादशकोटि मतदातारः सम्मिलिताः सन्ति।

अमुना उक्तं यत् आपत्तिं प्रस्तोतुं फरवरी मासस्य षष्ठो दिवसः अन्तिमावधिः वर्तते। उत्तर-प्रदेशे मार्चमासस्य षष्ठे दिने परिष्कृता संशोधिता अन्तिमा च मतदातृ-सूचिः प्रकाशयिष्यते। ततः परं मतदातृसूच्यां कथमपि परिष्कारं नैव करिष्यते।

शिक्षामन्त्री शास्त्रीयभाषाः

शिक्षामन्त्रिणा धर्मेन्द्रप्रधानेन अद्य देशस्य पञ्च-शास्त्रीय-भाषाणां पञ्चपञ्चाशत् दुर्लभाः बहुमूल्याः च साहित्यिक-कृतयः लोकार्पिताः। एतासु तमिळ, तेलुगु, मलयाळम्, कन्नड, ओडिया भाषाः च सन्ति। पुस्तकानि केन्द्रीय-भारतीय-भाषा-समित्या प्रकाशितानि सन्ति। नवदिल्ल्यां वार्ताहरैः सह वार्तालापं कुर्वन् श्रीप्रधानः अवदत् यत्, भारतीयभाषाः राष्ट्रं समाजं च संयोजयन्ति ऐक्यं च कुर्वन्ति। सः अवदत् यत् सर्वाः भारतीय-भाषाः राष्ट्रभाषाः इव इति प्रधानमन्त्रिणा नरेन्द्रमोदिना अवधानं दत्तम्। श्रीप्रधानः अधोरेखितवान् यत् गतवर्षे सर्वकारेण पञ्च-अन्याभिः भारतीयभाषाभिः अपि प्राचीन-मूल-कारणाच्च शास्त्रीय-भाषारूपेण मान्यता प्रदत्ता। एतासु मराठी, तेलुगु, बङ्गला, असमिया, पाली, प्राकृत च सन्ति।

मद्रासोच्चन्यायालयः

मद्रासोच्च-न्यायालयस्य मदुरै खण्डपीठेन तिरुप्पारन-कुंड्रम-पर्वत- स्थिते दीपथून-स्तम्भे दीप-प्रज्ज्वलनस्य अनुमति-प्रदानाय एकल-न्यायाधीशस्य आदेशः यथावत् प्रवर्तितः। न्यायमूर्तेः जी.जयचन्द्रनस्य न्यायमूर्तेः के.के. रामकृष्णनस्य च खण्डपीठेन उक्तं यत् यस्मिन् स्थाने दीपथून-नामकः प्रस्तर-स्तम्भो वर्तते तत्र भगवतः सुब्रह्मण्यम-स्वामिनः मन्दिरम् अस्ति । पीठेन प्रोक्तं यत् भारतीय-पुरातत्व-सर्वेक्षणस्य परामर्शस्य

अनन्तरं तत्र दीपं प्रज्ज्वालयिष्यते। न्यायालयेन उक्तं यत् तत्र उपस्थातुं जनानां सङ्ख्यायाः निर्धारणं कर्तुं शक्यते। याचिकाकर्ता निरञ्जन एस कुमारः अवदत् यत् तिरुप्पारन-कुंड्रम-पर्वते दीपप्रज्ज्वालनम् आवश्यकं वर्तते।

सी. बी. एस्. ई. परीक्षा

केन्द्रीय-माध्यमिक-शिक्षा-परिषदा (सी. बी. एस्. ई.) इत्यनेन अद्य परीक्षा-सम्बद्ध-कष्टं निवारणाय छात्राणां कृते मनोसामाजिक-परामर्श-समर्थनम् आरब्धम्। दशमी तः द्वादशी कक्षायाः परीक्षार्थिनां कृते निःशुल्क-मनोसामाजिक-परामर्श-सेवायाः प्रथमः चरणः अस्मिन् वर्षे जून-मासस्य एक दिनाङ्कपर्यन्तं प्रचलिष्यति। अस्य उपक्रमस्य उद्देश्यं परीक्षा-सम्बद्ध-कष्टस्य, भावनात्मक-स्वास्थ्यस्य च निवारणम् अस्ति, येन छात्राः

आत्मविश्वासेन, सन्तुलनेन, मानसिक-स्पष्टतया च फरवरी मासस्य सप्तदश-दिनाङ्कात् आरभमाणेसु अग्रिमपरीक्षायां सम्मिलितुं समर्थाः भवन्ति। छात्राः टोल्-फ्री-सङ्ख्यां एकं अष्ट शून्यं शून्यं एकं एकं अष्ट शून्यं शून्यं चत्वारि इत्यत्र सम्पर्कं कर्तुं शक्नुवन्ति तथा च इन्टराक्टिव्-वाइस-रिस्पान्स्-सिस्टम् इत्यस्य माध्यमेन हिन्दी-आङ्ग्ल-भाषयोः चतुर्विंशति होरासु सहयोगं प्राप्तुं शक्नुवन्ति।

विराम

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

प्रधानमन्त्री आन्ध्रप्रदेशः

प्रधानमन्त्री नरेन्द्रमोदी आन्ध्रप्रदेशस्य विशाख्-रिफाइनरी इत्यत्र हिन्दुस्तान्-पेट्रोलियम-कार्पोरेशन्-लिमिटेड् इत्यस्य अवशिष्ट-उन्नयन-सौकर्यस्य सफलतया आरम्भस्य प्रशंसाम् अकरोत्। सामाजिके अन्तर्जालीये पटले पेट्रोलियम-प्राकृतिक-ईंधन-मन्त्रिणः हरदीप सिङ्घ्-पुरी-वर्यस्य सन्देशं विनिमयी कुर्वन्, प्रधानमन्त्री अवदत् यत्, एषा अत्याधुनिक-सुविधा आत्मानिर्भरभारतस्य दृष्ट्या ऊर्जा-स्वातन्त्र्यं वर्धयितुं राष्ट्रस्य प्रयत्नेषु गतिं जनयिष्यति।

योगी जी राम जी

उत्तरप्रदेशस्य मुख्यमन्त्रिणा योगी आदित्यनाथेन प्रतिपादितम् यत् पञ्चविंशत्यधिक-द्विसहस्र इत्यस्य विकसितभारत्-जी राम्-जी अधिनियमः, देशस्य ग्रामीणाभिवृद्धि-परिवेशे ऐतिहासिकं, विकसितभारतस्य आधारं च भविष्यति। लोकभवने षड्विंशत्यधिक-द्विसहस्रतम वर्षस्य प्रथममन्त्री-मण्डलीय-सभायाः अनन्तरं विशेष-वार्ताहर-सम्मेलनम् संबोधयन्, लखनऊ-नगरे योगी आदित्यनाथः केन्द्रसर्वकारस्य निर्णयस्य प्रशंसाम् अकरोत्, तथा च उक्तवान् यत् अयं पारदर्शक-प्रक्रियाम् सुनिश्चेतुं, वृत्यावसरान् निर्मातुं, प्रत्याभूतिं प्रदातुं, ग्रामीणक्षेत्रेषु स्थायी-सम्पत्तिं निर्मातुं च महत्त्वपूर्णः अधिनियमः अस्ति, येन ग्रामीण-आधारभूतसंरचनाः वर्धते।

बाङ्ग्लादेशे हिंसा

बाङ्ग्लादेशस्य नरसिङ्गडी-नगरे, अज्ञातैः आक्रमणकारिभिः तीक्ष्ण-शस्त्र-प्रहारेण उपस्करादि-द्रव्य-आपणस्य स्वामी चत्वारिंशत् वर्षीयः हिन्दु-पुरुषः मारितः। नरसिङ्गडी-मण्डले उपस्कर-व्यापारिणः मोनी-चक्रवर्ती-इत्यस्य हत्यया सम्पूर्णे बाङ्ग्लादेशे भयम् क्रोधं च वर्धितमस्ति। गतसप्ताहेषु हिन्दु-समुदायस्य जनानां हत्या

चिन्तास्पद-श्रृङ्खलायां तस्य मृत्युः अभवत्। मोनी इत्यस्य हत्या अल्पे काले एव चतुर्थम् एतादृशम् प्रकरणम् अस्ति, येन बाङ्ग्लादेशे सार्वजनिकसुरक्षायाः, अल्पसङ्ख्यक-संरक्षणस्य, विधि-व्यवस्थायाः च स्थित्याः विषये गम्भीरा चिन्ता प्रकटिता। बाङ्ग्लादेशस्य आरक्ष्यानुसारं मोनी चक्रवर्ती ह्यः अपराह्णे एकादशवादने पलाश-उपमण्डलस्य चारसिन्धुर-बजार इत्यत्र आक्रमणे मारितः।

## ऋतु सञ्चेतना

देशस्य अतिशयभागेषु सघन-कुज्झटिका-कारणेन बहुत्र रेलसेवा दुष्प्रभाविता। रेलविभागस्य अनुसारं दिल्ली सम्भागस्य सप्ततिः रेलयानानि निहाराच्छादनेन स्वल्पदृश्यता कारणेन च विलम्बेन प्रयान्ति। यात्रिणः अपि सञ्चेतिताः यत् रेलस्थानकं प्रति प्रस्थानात् पूर्वं रेलयानानाम् प्रचलन-स्थितिम् अवगच्छन्तु इति। ऋतु विभागेन अद्य मध्यप्रदेशे बिहारे च सघन-कुज्झटिकायाः ऑरेंज अलर्ट इति नारङ्गवर्णीया सञ्चेतना प्रसारिता अस्ति। ऋतु विभागेन उक्तं यत् आगानि द्वि-त्रिदिनेषु दिल्ल्यां हरियाणायां चण्डीगढे पञ्जाबे हिमाचलप्रदेशे बिहारे छत्तीसगढे आडिशायां राजस्थाने हिमालयीये पश्चिमबङ्गाले देशस्य पूर्वोत्तरभागे अपि द्रष्टुं शक्यते।

## बैडमिण्टन-क्रीडा

भारतस्य लक्ष्य सेनः  मलेशियायाः कुआलालम्पुरे मलेशिया-ओपन- सुपर-750 इति बैडमिंटन-स्पर्धामालिकायां सिंगापुरस्य  जिया हेंग जेसन तेह इत्येनं पराजित्य पुरुषैकलवर्गे द्वतीयचक्रे प्रविष्टः।

।। इति वार्ताः ।।